अहतश्चाच भिन्नार्था ते वै निरयगामिनः ॥
पाषण्डा दूषकाश्चैव समयानाञ्च दूषकाः ।
ये प्रत्यवस्थिताश्चैव ते वै निरयगामिनः ॥
वृत्तिच्छेदं गृहच्छेदं दारच्छेदञ्च पार्थिव ! ।
मित्रच्छेदं तथाशायाः कृत्वा नरकगामिनः ॥
विषमव्यवहाराश्च विषमाश्चैव वृत्तिषु ।
लाभेषु विषमाश्चैव नरा निरयगामिनः ॥
कृताशं कृतनिर्वेशं कृतभक्तं कृतश्रमम् ।
भेदैर्ये व्यवकर्षन्ति ते वै निरयगामिनः ॥
द्यूतसंव्यवहाराश्च निष्परीषाश्च मानवाः ।
प्राणिहिंसाप्रवृत्ताश्च ते वै निरयगामिनः ॥
वेदविक्रयिणश्चैव वेदानाञ्चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥
केशविक्रायका राजन् ! विषविक्रायकाश्च ये ।
क्षीरविक्रायकाश्चैव ते वै निरयगामिनः ॥
चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः ।
विकर्मभिश्च जीवन्ति ते वै निरयगामिनः ॥
ब्राह्मणानां गवाञ्चैव कन्यानाञ्च महामते ! ।
येऽन्तरं यान्ति कार्य्येषु ते वै निरयगामिनः ॥
शस्त्रविक्रायकाश्चैव कर्त्तारश्च महीपते ! ।
शल्यानां धनुषाञ्चैव ते वै निरयगामिनः ॥
शिलाभिः शङ्कुभिर्व्वापि श्वभ्रैर्व्वा मनुजर्षभ ! ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिनः ॥
अगोप्तारश्च राजानो बलिषड्भागतस्कराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ।
शान्तान् दान्तानथ प्राज्ञान् दीर्घकालसहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ॥
बालानामथ वृद्धानां दासानाञ्चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ॥
इत्येतत् कथितं राजन् ! धर्म्माधर्म्मविनिर्णयम् ।
विज्ञाय पुरुषः कर्म्म धर्म्ममेव समाचरेत् ॥”
इति पाद्मे स्वर्गखण्डे २४ अध्यायः ॥
नरकविशेषगामिपापिनो यथा,—
“कूटसाक्षी तथा सम्यक् पक्षपातेन यो वदेत् ।
यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ॥
भ्रूणहा पुरहर्त्ता च गोघ्नश्च मुनिसत्तम ! ।
यान्ति ते नरके रोधे यश्चोच्छ्वासनिरोधकः ॥
सुरापो ब्रह्महा हर्त्ता सुवर्णस्य च शूकरे ।
प्रयाति नरके यश्च तैः संसर्गमुपैति वै ॥
राजन्यवैश्यहा ताले तथैव गुरुतल्पगः ।
तप्तकुम्भे स्वसृगामी हन्ति राजभटांश्च यः ॥
साध्वीविक्रयकृद्बध्यपालः केशरिविक्रयी ।
तप्तलौहे तु पच्यन्ते यश्च भक्तं परित्यजेत् ॥
‘केशरी अश्वः ।’
स्नुषां सुताञ्चापि गत्वा महाज्वाले निपात्यते ।
अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः ॥
वेददूषयिता यश्च वेदविक्रायकश्च यः ।
अगम्यागामी यश्च स्यात्ते यान्ति लवणं द्विज ! ॥
चौरो विमोहे पतति मर्य्यादादूषकस्तथा ।
देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ॥
स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत् ॥
पितृदेवातिथीन् यस्तु पर्य्यश्नाति नराधमः ।
लालाभक्षे स यात्युग्रे शरकर्त्ता च रोधके ॥”
‘पर्य्यश्नाति परित्यज्य आदौ भुङ्क्ते ।’
करोति कर्णिनो यस्तु यस्तु खड्गादिकृन्नरः ॥
प्रयान्ति ते विशसने नरके भृशदारुणे ।
असत्प्रतिग्रहीतारो नरके यान्त्यधोमुखे ॥
अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः ।
वेगी पूयवहश्चैको याति मिष्टान्नभुङ्नरः ॥
‘वेगी साहसकारी । पुत्त्रादीन् वर्ज्जयित्वा एक एव मिष्टान्नभुक् ।’
लाक्षामांसरसानाञ्च तिलानां लवणस्य च ।
विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! ॥
मार्ज्जारकुक्कुटच्छागान् श्ववराहविहङ्गमान् ।
पालयन्नरकं याति तमेव द्विजसत्तम ! ॥
रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा ।
सूची माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥
‘पत्यौ जीवति जाराज्जातः कुण्डः तदन्नभोजी माहिषो महिषोपजीवी । यद्वा,—
महिषीत्युच्यते भार्य्या भगेनोपार्ज्जितं धनम् ।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः ॥
इति स्मृतिः ॥
पर्व्वकारी धनादिलोभेनापर्व्वसु अमावास्यादिक्रियाप्रवर्त्तकः ।’
अगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः ।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥
मधुहा ग्रामहन्ता च याति वैतरणीं नरः ।
रेतःपानादिकर्त्तारो मर्य्यादाभेदिनश्च ये ॥
ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये ।
असिपत्रवनं याति वनच्छेदी वृथैव यः ॥
औरभ्रिको मृगव्याधो वह्निज्वाले पतन्ति वै ।
यान्त्येते द्विज ! तत्रैव यश्चापाकेषु वह्निदः ॥
व्रतेषु लोपको यश्च स्वाश्रमाद्विच्युतश्च यः ।
सन्दंशयातनामध्ये पततस्तावुभावपि ॥
दिवास्वप्नेषु स्कन्दन्ति ये नरा ब्रह्मचारिणः ।
पुत्त्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥
एते चान्ये च नरकाः शतशोऽथ सहस्रशः ।
येषु दुष्कृतकर्म्माणः पच्यन्ते यातनागताः ॥
तथैव पापान्येतानि तथान्यानि सहस्रशः ।
भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥
वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः ।
कर्म्मणा मनसा वाचा निरयेषु पतन्ति वै ॥
अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः ।
देवाश्चाधोमुखान् सर्व्वानधःपश्यन्ति नारकान् ॥
स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः ।
धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् ॥
सहस्रभागाः प्रथमा द्वितीयानुक्रमास्तथा ।
सर्व्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः ॥
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः ।
पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ॥”
इति विष्णुपुराणे । २ । ६ । ७—१२ ॥
अपि च ।
“कथयामि विचित्राणां कर्म्मणां विविधा गतीः ।
ताः शृणुष्व महाराज ! याः श्रुत्वा मोक्षमाप्नुयात् ॥
परवित्तं परापत्यं कलत्रं दारकञ्च यः ।
हरते बुद्धिमोहेन सोऽन्ते मृत्युवशं गतः ॥
कालपाशेन संबद्धो यमदूतैर्महाबलैः ।
तामिस्रे पात्यते तावत् यावद्वर्षसहस्रकम् ॥
तत्र ताड़नमुद्गुताः कुर्व्वन्ति यमकिङ्कराः ।
पापभोगेन सम्मत्तस्ततो योनिन्तु शौकरीम् ॥
तत्र भुक्त्वा महादुःखं मानुषत्वं गमिष्यति ।
रोगादिचिह्नितं तत्र दुर्यशोज्ञापकं स्वकम् ॥
भूतद्रोहं विधायैवं केवलं सकुटुम्बकम् ।
पुष्णाति पापनिरतः सोऽन्धतामिस्रके पतेत् ॥
ये नरा इह जन्तूनां वधं कुर्व्वन्ति वै मृषा ।
ते रौरवे निपात्यन्ते खाद्यन्ते रुरुभिर्यतः ॥
यः खादरार्थं भूतानां वधमाचरति स्फुटम् ।
महारौरवसंज्ञे तु पात्यते स यमाज्ञया ॥
यो वै निजन्तु जनकं ब्राह्मणं द्वेष्टि पापकृत् ।
कालसूत्रे महादुर्गे योजनायतविस्तृते ॥
यावन्ति पशुरोमाणि गवां द्वेषं करोति यः ।
तावद्वर्षसहस्राणि पच्यते यमकिङ्करैः ॥
यो भूमौ भूपतिर्भूत्वा दण्डायोग्यन्तु दण्डयेत् ।
करोति ब्राह्मणस्यापि देहदण्डं विलोलुपः ।
स शूकरमुखैर्दुष्टैः पीड्यते यमकिङ्करैः ॥
पश्चाद्दुष्टासु योनीषु जायते पापभुक्तये ।
ब्राह्मणानां गवां ये तु द्रव्यं वित्तं तथाल्पकम् ॥
वृत्तिं वा रक्षते मोहाल्लुम्पन्ति खलतान्नराः ।
ते परत्रान्धकूपे च पात्यन्ते च महाहिताः ॥
योऽर्थं स्वयमुपाहृत्य मधुरश्चाति लोलुपः ।
न देवाय न सुहृदे ददाति रसनातुरः ॥
स पतत्येव नरके कृमिभोजनसंज्ञके ।
अनापदि नरो यस्तु हिरण्यादीनपाहरेत् ॥
ब्रह्मस्वं वा महादुष्टः स दंशे नरके पचेत् ।
यः स्वदेहं प्रपुष्णाति नान्यं जानाति मूढ़धीः ॥
मनसा कल्पितं द्रव्यं विदुषे यो ददाति न ।
स पुमान्नरकं याति यावदिन्द्राश्चतुर्द्दश ॥
पश्चाद्दुष्टासु योनीषु जायते वर्णसङ्करः ।
दानानि वाड़वे दत्त्वा पुनः शुद्धो भविष्यति ॥
वाचा दत्तं मनोदत्तमिति साधं वदेद्यदि ।
कम्पन्ते पितरस्तस्य नरकाय समुत्सुकाः ॥
वाचा दत्तं मनोदत्तं दत्तं प्राञ्जिकुशोदकम् ।
एतद्दत्तमदत्तं स्यात् जिह्वामुत्पाटयेद्यमः ॥
स यात्यते तैलतप्ते कुम्भीपाकेऽतिदारुणे ॥
यो नगम्यां स्त्रियं मोहाद्योषिद्भावाच्च कामयेत् ।
तं तया किङ्कराः शूर्म्यां परिवद्धञ्च कुर्व्वते ॥
ये बलाद्वेदमर्य्यादां लुम्पन्ति स्वबलोद्धताः ।
ते वैतरण्यां पतिता मांसशोणितभक्षकाः ॥
वृषलीं यः स्त्रियं कृत्वा तया गार्हस्थ्यमाचरेत् ।
पूयोदे निपतत्येव महादुःखसमन्वितः ॥
ये दम्भानाश्रयन्ते वै धूर्त्ता लोकस्य वञ्चने ।
वैशसे नरके मूढ़ाः पतन्ति यमताड़िताः ॥
ये सवर्णां स्त्रियं मूढ़ाः पाययन्ति स्वरेतसम ।